**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# थारूलोकनृत्यानि : एकमध्ययनम्

**मोहनप्रसादचौधरी**

*उपप्राध्यापकः, ने.सं.वि., शारदाविद्यापीठम्*

Chaudhary.mpj@gmail.com

https://orcid.org/0009-0002-7860-6494

https://doi.org/10.3126/srj.v1i2.99134

**शोधसारः**

*प्रस्तुतेऽस्मिन् अनुसन्धानलेखे थारू-समुदायस्य लोकनृत्यानां स्वरूपम्, प्रकाराः, सांस्कृतिकवैशिष्ट्यम्, सामाजिकधार्मिकमहत्त्वं, वर्तमानावस्था, संरक्षणस्य आवश्यकता च सम्यगनुसन्धीयन्ते। अध्ययनस्य प्रमुखोद्देशः थारू-लोकनृत्यानां ऐतिहासिकविकासं, सांस्कृतिकपरम्परायां तेषां स्थानम्, समाजजीवने तेषां योगदानम्, आधुनिकीकरणस्य प्रभावं च विश्लेषयितुमस्ति। अस्मिन्नध्ययने गुणात्मकानुसन्धानपद्धतिरवलम्बिता। द्वितीयकस्रोतोरूपेण प्रकाशितग्रन्थाः, अनुसन्धानपत्राणि, सांस्कृतिकप्रतिवेदनानि, सम्बन्धितसाहित्यं च विश्लेषितम्। अध्ययनात् ज्ञायते यत् थारू-लोकनृत्यानि समुदायस्य सांस्कृतिकपहिचानस्य, सामाजिकैक्यस्य, लोकपरम्परारक्षणस्य च प्रमुखाधाराणि सन्ति। तथापि आधुनिकीकरणस्य, वैश्वीकरणस्य, शहरीकरणस्य, नवमानवसमुदायस्य परिवर्तिताभिरुचेः च प्रभावेण एतानि नृत्यानि विविधानामाह्वानानाम् अनुभवन्ति। अतः तेषां संरक्षणाय, संवर्धनाय, व्यवस्थितदस्तावेजीकरणाय, अनुसन्धानविस्ताराय च राज्यस्य, शैक्षिकसंस्थानां, स्थानीयसमुदायस्य च समन्वितः प्रयत्नः परमावश्यकः। एतादृशैः प्रयासैः थारू-लोकनृत्यानां मौलिकपरम्परा भाविपीढीष्वपि सुरक्षितरूपेण संवर्तिष्यते।*

**शब्दकुञ्जी** - थारू-समुदायः, लोकनृत्यम्, लोकसंस्कृतिः, सांस्कृतिकविरासत्, संरक्षणम्, नेपालः।

## विषय-परिचयः

लोकसंस्कृतिः कस्यापि समाजस्य ऐतिहासिकानुभवानाम्, धार्मिकविश्वासानाम्, सामाजिकपरम्पराणाम्, जीवनमूल्यानां च समष्टिरूपा अभिव्यक्तिः भवति। तस्याः विविधेषु अङ्गेषु लोकनृत्यं महत्त्वपूर्णतमं सांस्कृतिकमाध्यममस्ति, यत् समाजस्य जीवनपद्धतिम्, भावविश्वम्, सामुदायिकसम्बन्धांश्च सजीवतया प्रकाशयति। नेपालदेशः बहुजातीय-बहुभाषिक-बहुसांस्कृतिकराष्ट्रत्वेन विख्यातः, यत्र प्रत्येकस्य समुदायस्य स्वकीयाः लोकपरम्पराः राष्ट्रियसांस्कृतिकसम्पदोऽभिन्नमङ्गत्वेन प्रतिष्ठिताः सन्ति। (चौधरी, २०६९, पृ.७७)

तेषु समुदायेषु थारू-समुदायः प्राचीनतमेषु आदिवासीजनसमुदायेषु परिगण्यते। अस्य समुदायस्य लोकनृत्यानि धार्मिकानुष्ठानेषु, ऋतूत्सवेषु, कृषिकार्यसम्बद्धावसरेषु, विवाहादिसंस्कारेषु, सामुदायिकसमारोहेषु च विशेषरूपेण प्रचलितानि सन्ति। एतानि नृत्यानि केवलं मनोरञ्जनस्य साधनानि न, अपि तु सामुदायिकैक्यस्य, सांस्कृतिकपरिचयस्य, लोकपरम्परासंरक्षणस्य च सशक्तमाध्यमानि भवन्ति।

वर्तमाने वैश्वीकरणस्य, आधुनिकीकरणस्य, सञ्चारप्रविधेर्विस्तारस्य, नगरीकरणस्य च प्रभावेण थारू-लोकनृत्यानां स्वरूपे, प्रस्तुतीकरणे, सामाजिकप्रयोगे च विविधाः परिवर्तनाः दृश्यन्ते। एकस्मिन् पक्षे एते परिवर्तनाः

लोकनृत्यानां प्रचारप्रसारं वर्धयन्ति, अपरस्मिन् पक्षे तेषां मौलिकस्वरूपस्य संरक्षणे चुनौतीः जनयन्ति। अतः थारू-लोकनृत्यानां उत्पत्तिः, विकासः, प्रकाराः, सांस्कृतिकमहत्त्वम्, वर्तमानावस्था, संरक्षणोपायाश्च अनुसन्धानात्मकदृष्ट्या सम्यगध्येतव्याः। एष एव प्रस्तुतस्य अनुसन्धानस्य विषयः, यस्य माध्यमेन थारू-लोकनृत्यानां सांस्कृतिकमूल्यं तेषां समकालीनप्रासङ्गिकता च विशदीकर्तुं प्रयत्नः क्रियते।

## समस्याकथनम्

नेपालदेशः बहुजातीय-बहुभाषिक-बहुसांस्कृतिकपरम्परया समृद्धः देशः अस्ति। तासु विविधासु जनजातिषु थारूजनजातिः स्वकीयया विशिष्टया सांस्कृतिकपरम्परया, लोकाचारैः, लोकसाहित्येन, लोकगीतैः, लोकनृत्यैः, उत्सवैः, संस्कारैश्च विशेषं स्थानमधितिष्ठति। थारू-लोकनृत्यानि तेषां सामुदायिकजीवनस्य, धार्मिकविश्वासानाम्, सामाजिकव्यवहारस्य, ऐतिहासिकस्मृतेः सांस्कृतिकचेतनायाश्च जीवन्ताः प्रतीकाः सन्ति। (चौधरी, २०६२, पृ.१९) तानि केवलं मनोरञ्जनस्य साधनानि न, अपितु सामुदायिकैक्यस्य, सांस्कृतिकपरिचयस्य, लोकपरम्परासंरक्षणस्य च उपयुक्तमाध्यमानि भवन्ति।

अद्यत्वे वैश्वीकरणस्य, आधुनिकीकरणस्य, नगरीकरणस्य, आधुनिकसञ्चारमाध्यमानां विस्तारस्य तथा परिवर्तितजीवनशैल्याः प्रभावेण पारम्परिकेषु लोकनृत्येषु क्रमशः परिवर्तनं दृश्यते। नवयुवानः पारम्परिकलोकसंस्कृतेः प्रति अपेक्षितां रुचिं न दर्शयन्ति; फलतः बहूनि लोकनृत्यानि लोपाभिमुखानि सञ्जातानि। तेषां प्रामाणिकस्वरूपम्, ऐतिहासिकविकासः, सांस्कृतिकमूल्यम्, सामाजिकप्रयोजनं च पर्याप्ततया न प्रलिखितम्। उपलब्धेषु ग्रन्थेषु अपि थारू-लोकनृत्यानां समग्रं तुलनात्मकं च शास्त्रीयमनुशीलनं विरलमेव दृश्यते।

विशेषतः **झुम्रानृत्यम्, सख्यानृत्यम्, मघौटानृत्यम्, बर्कानृत्यम्, लट्ठह्वानृत्यम्, मुङ्ग्रह्वानृत्यं** च इत्यादीनां लोकनृत्यानां स्वरूपं, प्रयोजनम्, धार्मिक-सामाजिक-सांस्कृतिकपक्षाः, तेषां संरक्षणोपायाश्च सम्यगनुसन्धानेन न विवेचिताः। एतादृशायां परिस्थितौ थारू-लोकनृत्यानां तात्त्विकस्वरूपस्य, सांस्कृतिकमहत्त्वस्य, वर्तमानस्थितेः, संरक्षणसम्भावनानां च शास्त्रीयदृष्ट्या अनुसन्धानं कर्तुमावश्यकता वर्तते।

## अतोऽस्यानुसन्धानस्य प्रमुखा समस्या एषा यथा :

थारू-लोकनृत्यानां मौलिकस्वरूपं सांस्कृतिकवैशिष्ट्यं च किमिति?, तेषां सांस्कृतिकं, धार्मिकं, सामाजिकञ्च महत्त्वं कथं विवेचनीयम्?

क) आधुनिकपरिवर्तनैः तेषु कः प्रभावः जातः? तेषां संरक्षणसंवर्धनयोः प्रभावका उपायाः के ?
ख) थारू-लोकनृत्यानां संरक्षणे संवर्धने च के प्रमुखाः बाधककारकाः विद्यन्ते?
ग) थारू-लोकनृत्यानां सांस्कृतिकपरिचयरक्षणे सामाजिक-आर्थिकविकासे च किं योगदानमस्ति?
घ) इत्येतासां समस्याणां समाधानार्थं प्रस्तुतमिदमनुसन्धानं प्रवर्तते।

## उद्देश्यम्

अस्यानुसन्धानात्मकलेखस्य मुख्योद्देश्यं थारूजनजातेः लोकनृत्यानां स्वरूपं, वैशिष्ट्यं, सांस्कृतिकमहत्त्वं, सामाजिकप्रयोजनं, धार्मिकाधारं, ऐतिहासिकविकासक्रमं च सम्यगध्येतुं तेषां संरक्षणसंवर्धनयोश्च आवश्यकता प्रतिपादयितुमस्ति। तदर्थमस्य लेखस्य प्रमुखा उद्देश्यानि इमानि भवन्ति—

१. थारूजनजातेः प्रचलितानां लोकनृत्यानां मौलिकस्वरूपं, सांस्कृतिकवैशिष्ट्यं, तेषां सांस्कृतिकं, धार्मिकं, सामाजिकञ्च महत्त्वं विवेचनम्,

२. थारूसमाजे प्रचलितानां झुम्रानृत्यस्य, सख्यानृत्यस्य, मघौटानृत्यस्य, बर्कानृत्यस्य, लट्ठह्वानृत्यस्य, मुङ्ग्रह्वानृत्यस्य च सांस्कृतिकं, धार्मिकं, सामाजिकं च महत्त्वं विश्लेषणम्,

३.आधुनिकतायाः, वैश्वीकरणस्य, नगरीकरणस्य तथा सञ्चारमाध्यमानां प्रभावेन थारू-लोकनृत्येषु जातान् परिवर्तनान् तेषां परिणामांश्च समीक्षणम्,

४. थारू-लोकनृत्यानां सांस्कृतिकपरिचयरक्षणे सामाजिक-आर्थिकविकासे च योगदानं विवेचनम्,

एवं प्रस्तुतस्यानुसन्धानस्य मूलाभिप्रायः केवलं थारू-लोकनृत्यानां वर्णनमेव न, अपितु तेषां सांस्कृतिकमूल्यस्य, सामाजिकोपयोगितायाः, ऐतिहासिकमहत्त्वस्य तथा संरक्षणावश्यकतायाः शास्त्रीयदृष्ट्या सम्यगनुशीलनमिति।

## अध्ययनविधिः

प्रस्तुतमिदमनुसन्धानं गुणात्मकपद्धत्याधारितं वर्णनात्मक-विश्लेषणात्मकञ्चास्ति। अस्मिन्नध्ययने प्राथमिकद्वितीयकस्रोतसोः उपयोगः कृतः। प्राथमिकस्रोतांसि क्षेत्रावलोकनं, साक्षात्काराश्च; द्वितीयकस्रोतांसि थारू-संस्कृतिविषयकाः ग्रन्थाः, अनुसन्धानलेखाः, शोधप्रबन्धाः, पत्रपत्रिकाश्च सन्ति। सङ्कलितानां तथ्याङ्कानांविषयानुसारं वर्गीकरणं कृत्वा तेषां विश्लेषणं तुलनात्मकदृष्ट्या च मूल्याङ्कनं विहितम्।

## विषयविश्लेषणम्

**लोक**इति पदस्य व्युत्पत्तिः*लोकृ (दर्शने)*इति धातोःघञ्-प्रत्यययोगेन निष्पद्यते। तस्य मूलार्थः*दर्शनम्*, *अवलोकनम्*, *प्रेक्षणम्* वा इति भवति। अयं शब्दोऽनेकार्थकत्वेन प्रसिद्धः। सन्दर्भभेदेन चक्षुषा निरीक्षणम्, जनसमुदायः, समाजः, प्रजाः, प्राणिवर्गः, सामान्यजनजीवनम्, लोकाचारः, प्रदेशः, समुदायः, इत्यादीन् बहूनर्थान् बोधयति। यद्यपि*लोक*इति पदं व्यापकवाचकं विद्यते, तथाप्यत्रास्मिन् अनुसन्धानप्रसङ्गे तेन विशेषतःग्रामीणसमाजःएव विवक्षितो भवति। (थारू, २०६९, पृ.११७)

लोकसाहित्यस्य स्वरूपनिरूपणविषये पाश्चात्यविद्वांसौके. मोर्नरतथाआर्. एस्.इत्येतौ प्रतिपादयतः—यावत्कालं विद्वद्भिः सङ्गृह्य लिपिबद्धरूपेण न संरक्ष्यते, तावदेकस्मात् पिढ्यन्तरात् अपरस्मिन् पिढ्यन्तरं मौखिकपरम्परया सञ्चरन्तः गीतप्रबन्धाः, आख्यानानि, दन्तकथाः, लोककथाश्चलोकसाहित्यम्इति कथ्यन्ते। (शर्मा, लुइटेलः, २०६३, पृ. २)

एवमेवमार्टिन् ग्रेइत्यस्य मते लिखितपरम्परया अनभिभूतत्वेन केवलं मौखिकपरम्परया पीढीपरम्परानुगततया सञ्चरन्त्यः परम्परिताः उक्तयः, कथाः, गीतानि च लोकसाहित्यमित्यभिधीयन्ते। (शर्मा, लुइटेलः, २०६३, पृ. २)

एताभ्यां परिभाषाभ्यां स्पष्टमवगम्यते यत् लोकसमाजस्य सुखदुःखानि, स्नेहप्रेमभावनाः, जीवनयात्रायाः विविधाः अनुभूतयः, सामाजिकानुभवाश्च सरलया सहजया च लोकभाषया गीत-वाद्य-नृत्यादिमाध्यमेन यत्र कलात्मकतयाभिव्यज्यन्ते, तत् साहित्यंलोकसाहित्यमिति परिगण्यते।

लोकजीवनस्य कटुमधुरानुभवाः, हृदयस्पर्शिनः भावप्रवाहाश्च विविधाभिः साहित्यशैलीभिः प्रस्तूयन्ते। तेषु प्रमुखतया लोकनृत्यम्, लोकगीतम्, लोकोक्तयः, सूक्तयः, प्रहेलिकाः, उखान-प्रवादाश्च समाविशन्ति।

अस्य शोधप्रबन्धस्य मुख्यविषयःथारू-जनजातेः लोकनृत्यपरम्परायाः अध्ययनमिति सन्, अत्र*लोक*इति पदस्य व्युत्पत्तिविचारस्य विस्तरेण निरूपणम् अनपेक्ष्य प्रतिपाद्यविषयस्य विवेचनमेव समीचीनमिति मन्यते।

## थारू-समुदाये प्रचलितानि मौलिकानि लोकनृत्यानि

थारू-समुदायः सांस्कृतिकवैभवसमन्वितः, परम्परासम्पन्नश्च जनसमुदायोऽस्ति। अस्य समुदायस्य विशिष्टसांस्कृतिकपरिचायकत्वेन लोकनृत्यपरम्परा विशेषं स्थानमधितिष्ठति। एतानि नृत्यानि ऋतुभेदेन, पर्वभेदेन, उत्सवभेदेन, सामाजिकसंस्कारभेदेन च परस्परं वैचित्र्यमुपयान्ति। (दहितः, २०७७, पृ. १४१)

अपि चैकस्मिन्नपि दिने प्रातःकाले, पूर्वाह्ने, मध्याह्ने, सायंकाले, रात्रौ, अर्धरात्रे, प्रभातसमये च गीयमानानां गीतानां मादलवादनतालानाञ्चस्पष्टं वैविध्यमवलोक्यते।

यथाहुर्डुङ्ग्वा-नृत्येमध्याह्ने*राम-ककहरा*, सायंकाले*लटिया*, प्रभातसमये*राम-विहग्रा*, प्रातःकाले च*मही-रावण*इत्याख्यानि गीतानि गीयन्ते।

तथैव चैत्र-वैशाखमासयोः*मैना*-गीतानि, ज्यैष्ठ-श्रावणमासयोः*सजना*-गीतानि, भाद्रपदात् मार्गशीर्षपर्यन्तं*सख्या*, *बर्कीमार*, *फुलवार*, *गुर्बाक-जर्मौटी*इत्यादीनि गीतनृत्यानि प्रचलन्ति। (दहितः, २०७७, पृ. १४१)माघमासे*धुम्रु*, डफ, *मघौटा*-गीतानि, फाल्गुनमासे*मागर*तथा होलीसम्बद्धानि गीतानि विशेषतया गीयन्ते। अपरञ्चबरमास्याइति गीतप्रकारः वर्षस्य द्वादशसु मासेष्वपि सर्वदा गेयत्वेन प्रसिद्धः।

एवंविधस्य समृद्धलोकनृत्यपरम्परायाः प्रमुखरूपाणां संक्षिप्तं विवेचनम् अधोलिखितप्रकरणेषु क्रमशः प्रस्तूयते।

### *(क) झुम्रा-नृत्यम्*

**झुम्रा**इति पदस्य व्युत्पत्त्या केचन जनाः एकत्र समागत्य सामूहिकरूपेण गीतगायनं नृत्यप्रदर्शनं च कुर्वन्ति इत्यर्थः प्रतीयते। नृत्यसमये नर्तकानां समूहबद्धतया लयतालानुसारेण देहचालनम्, परस्परमुत्साहवर्धनं च दृश्यते; एतस्मादेव कारणादस्य नृत्यस्य**झुम्रा**इति संज्ञा प्रचलितेति मन्तुं शक्यते। (दहितः, २०७७, पृ. १४२)

इदं नृत्यं पश्चिमतराईप्रदेशवर्तिनां थारू-जनजातीनां प्रमुखेषु लोकनृत्येषु अन्यतमं परिगण्यते। विशेषतया दशहरा-दीपावली-महोत्सवयोः अस्य प्रदर्शनस्य प्राचुर्यमवलोक्यते। विशिष्टेषु पर्वकालेषु सम्पाद्यमानत्वादेतत् **पर्वनृत्यम्**इत्यपि अभिधीयते। तथापि वर्तमानकाले सामाजिक-सांस्कृतिकपरिवर्तनानुगुणं आवश्यकता-अनुसारेण वर्षस्य कस्यापि कालेऽप्यस्य नृत्यस्य प्रदर्शनं विधीयते।

नेपालस्य कैलाली, बर्दिया तथा देउखुरी-प्रदेशेषु एतन्नृत्यं विशेषप्रचलितमस्ति। अस्मिन् नृत्ये सामान्यतया एकः मादलवादकः, एकः अथवा द्वौ नर्तकौ, नृत्यस्य हास्य-मनोरञ्जनात्मकं पक्षं सजीवयितुं**'स्वङ्ग्या'**इत्याख्यः हास्यपात्रधारी (विदूषकः) च सहभागी भवति। एतदतिरिक्तं गीतगायकाः द्वयोः पक्षयोः विभज्य प्रश्नोत्तर-शैलीमनुसृत्य सामूहिकरूपेण गीतगायनं कुर्वन्ति, येन नृत्यस्य सौन्दर्यं, लयात्मकता, रसात्मकता चाधिकतरं वर्धते। (दहितः, २०७७, पृ. १४१) अस्मिन् नृत्ये गीयमानानां गीतानां निदर्शनरूपमेकं गीतमधः प्रदर्श्यते।

**मूलरूपम्**

केटा : अरी जोगनी स्वरुपम मोरे गोरी जैसे महकै ना बेबुरी, अरी जोगनी स्वरुपम मोरे

केटी : भँवरा स्वरुपम मोरे छैला जैसे रस लिहवै मोरे, भँवरा स्वरुपम मोरे

केटा : अरी हे सुरहुर, सुरहुर हो बहे पुरवैया

केटी : अरी हे सुरहुर, सुरहुर हो बहे पुरवैया

केटा : अरी अँटवामे बैठिके गोरी पन्ह्वा दार गोँरी बिनै, अरी अँटवामे बैठिके

केटी : डेलवाके पन्ह्वा मोर हेरी छैलवा मुस्की मरलो, डेलवाके पन्ह्वा मोर

केटा : सखिय हो नचटी हँसटी बझल मैया मोर सखिय हो

केटी : सखिय हो नचटी हँसटी बझल मैया मोर सखिय हो

केटा : यिहरी अँगनवामे सुन फुला फुल सखिय हो।

केटी : यिहरी अँगनवामे सुन फुला फुल सखिय हो। (दहितः, २०७७, पृ. १४३)

***झुम्रा-नृत्ये गीयमानगीतस्य संस्कृत-भावानुवादः***

**युवकः**—

अये सुन्दरि! त्वं योगिनीस्वरूपिणीव सुगन्धिना स्वभावेन सर्वान् मोदयसि। तव शरीरसौरभं नवप्रस्फुटितपुष्पाणामिव मनोहरम् अस्ति।

**युवतिः**—

अये प्रिये ! त्वं भ्रमरस्वरूपा असि। यथा भ्रमरः पुष्पाणां मधुरसं पिबति, तथैव मम प्रेमरसस्यास्वादनं करोषि।

**युवकः**—

अहो! मन्दमन्दः सुगन्धवाही पूर्ववायुः सर्वतः सम्यग्वहति।

**युवतिः**—

आम्, एष एव मृदुलः पूर्वसमीरः स्वशीतलस्पर्शेन सर्वान् प्रमोदयति।

**युवकः**—

गृहाङ्गणस्योपवेशनस्थाने उपविश्य हे सुन्दरि! त्वं पत्रनिर्माणे (पर्णपात्र-निर्माणे) निरता दृश्यसे।

**युवतिः**—

मया निर्मितं तत् पर्णपात्रं निरीक्ष्य मम प्रियतमः स्मितपूर्वकं मामवलोकयति।

**युवकः**—

हे सखि! नृत्यहास्याभ्यां मम जननी अपि अत्यन्तं प्रहृष्टा जाता।

**युवतिः**—

आम् सखि! नृत्यहास्यविलासेन मम माताऽपि परमसन्तोषमवाप।

**युवकः**—

पश्य, अस्मिन्नेव गृहाङ्गणे सुवर्णप्रभाणि पुष्पाणि प्रस्फुटितानि सन्ति, हे सखि!

**युवतिः**—

आम् सखि! अस्मिन्नेवाङ्गणे सुवर्णसदृशानि मनोहराणि पुष्पाणि सर्वतो विकसितानि दृश्यन्ते।

## गीतस्य सांस्कृतिक-विश्लेषणम्

अयं लोकगीतः थारू-जनजातेः समृद्धायाः लोकसांस्कृतिकपरम्परायाः सजीवं प्रतिनिधित्वं करोति। अस्मिन् गीते ग्रामीणजीवनस्य सहजता, सामाजिकसौहार्दम्, पारिवारिकसम्बन्धाः, प्रकृतिसौन्दर्यस्य च रमणीयं चित्रणं दृश्यते।

युवकयुवत्योः संवादात्मकशैली गीतस्य प्रमुखं वैशिष्ट्यमस्ति, या परस्परस्नेहस्य, विश्वासस्य, सौहार्दस्य च भावान् स्वाभाविकतया प्रकाशयति।

गीतस्योपमानप्रयोगेषु योगिनी, भ्रमरः, पुष्पाणि, पूर्वसमीरः इत्यादयः प्रकृतिसम्बद्धाः पदार्थाः प्रयुक्ताः सन्ति। एतेषां प्रयोगेण लोकजीवनस्य प्रकृत्याः सह अभिन्नसम्बन्धः सुस्पष्टतया प्रतिपाद्यते। ग्रामीणजनानां दैनन्दिनजीवनम्, तेषां श्रमशीलता, सरलता, निष्कपटभावश्च गीतस्य प्रत्येकस्मिन् अंशे प्रतिबिम्बितः दृश्यते।

अत्र प्रयुक्ताः नृत्यगीताः केवलं मनोरञ्जनस्य साधनं न सन्ति, अपितु सामाजिकैक्यस्य, सामूहिकसहकारस्य, सांस्कृतिकपरम्परायाः च संरक्षणस्य प्रभावकानि माध्यमानि सन्ति। गीतगायनं नृत्यप्रदर्शनं च सामूहिकरूपेण सम्पद्येते, येन समुदायस्य परस्परसौहार्दं दृढतरं भवति।

गीतस्य हास्यविनोदात्मकः पक्षः**स्वङ्ग्या**-नामकपात्रस्य माध्यमेन विशेषतया समुज्ज्वलितो भवति। अनेन नृत्यप्रदर्शनं केवलं कलात्मकमेव न भवति, अपि तु प्रेक्षकाणां हृदयेषु हर्षोल्लासस्य सञ्चारमपि करोति।

अस्य गीतस्य भावभूमौ प्रेम, स्नेहः, प्रकृतिप्रेम, पारिवारिकसामीप्यम्, सामाजिकसमरसता चेति मूल्यचतुष्टयं सुस्पष्टतया निहितम् अस्ति। एतानि मूल्यानि थारू-समुदायस्य सांस्कृतिकचेतनायाः मूलाधारत्वेन परिगण्यन्ते।

अतः अयं लोकगीतः केवलं गेयकाव्यरूपेण न परिगण्यते, अपितु थारू-जनजातेः सामाजिकजीवनस्य, सांस्कृतिकविश्वासस्य, लोकाचारस्य, सौन्दर्यबोधस्य च जीवन्तः सांस्कृतिकनिधि इति निर्णेतुं शक्यते।

### *ख) सख्या (सखिया) नृत्यम्*

थारूजनजातेः लोकसंस्कृतेः प्रतिनिधिभूतं**सख्या (सखिया) नृत्यम्**अद्वितीयवैशिष्ट्येन, सांस्कृतिकगौरवेण, परम्परासम्पन्नतया च समलङ्कृतम् अस्ति। एतन्नृत्यं विशेषतया दशहरा-महोत्सवस्य प्रसङ्गे सम्पाद्यते। तस्मिन् अवसरे प्रायः सर्वेषु थारूग्रामेषु तस्य गीतवाद्यनिनादः प्रतिध्वनति, येन समग्रः पर्वोत्सवः हर्षोल्लासपूर्णः, जीवन्तः, सांस्कृतिकवैभवसमन्वितश्च भवति। (दहितः, २०७७, पृ. १४१)

अस्य नृत्यस्य मूलाधारः श्रीकृष्णस्य दिव्यचरितमस्ति। अतः श्रीकृष्णजन्माष्टमी-दिनमारभ्य प्रतिदिनं सायंभोजनानन्तरं नियमितरूपेण अस्य नृत्यस्य प्रदर्शनं विधीयते। एषः क्रमः दशहरा-टीका-दिनपर्यन्तं, अर्थात् कोजागरीपूर्णिमायाः पर्यन्तं, निरन्तरमवलम्ब्यते।

एतन्नृत्यस्य आयोजनं ग्रामस्य**'बरघर'**, सम्माननीयैः भद्रजनैः तथा**'गुर्वा'**इत्याख्येन धार्मिक-सांस्कृतिकसंरक्षकेण संयुक्तरूपेण क्रियते। अस्मिन् नृत्ये मादलवादकयुवकानां समूहः, नर्तकानां (नतर्की) समूहः, गीतप्रशिक्षणस्य प्रमुखाचार्यः**'मोहरिन्या'**इत्याख्यः च स्वस्वकर्तव्येषु महत्त्वपूर्णं योगदानं वहन्ति।

नृत्यस्य सुव्यवस्थितसञ्चालनार्थं नर्तकसमूहात्**'अगुन्या'**नामकः एकः प्रमुखः, **'पछगिन्या'**इत्याख्यौ द्वौ सहायकी च नियुज्येते। तथैव मादलवादकसमूहेऽपि**'मन्दरिया'**नामकः एकः प्रमुखः सम्पूर्णस्य वादनव्यवस्थायाः नेतृत्वं करोति। (दहितः, २०७७, पृ. १४३)

नृत्यस्य प्रारम्भदिवसादारभ्य समापनदिवसपर्यन्तं प्रतिदिनं मादलवादकाः नृत्यस्य आदौ अन्ते च**'झ्वाङ्'**इति विशिष्टतालं वादयन्ति। प्रथमदिने नर्तकाः हरितानि कूष्माण्डपत्राणि हस्तेषु धारयित्वा नृत्यन्ति। द्वितीयदिनादारभ्य प्रायः पञ्चदशदिनपर्यन्तं ग्रामेषु सुलभतया प्राप्यमाणस्य सनपातस्य अग्रभागं (फुर्कम्) निर्माय हस्तेषु धारयन्ति। ततः परं नानावर्णरिब्बनैः सुशोभितानि मञ्जीराणि वादयन्तः नृत्यप्रदर्शनं कुर्वन्ति।

अस्य नृत्यस्य सौन्दर्यवर्धनाय तथा प्रेक्षकाणामाकर्षणाय श्रीकृष्णचरितसम्बद्धगीतानां अतिरिक्तं परम्परानुसारं**'पैयाँ'**इति विशेषनृत्यमपि प्रदर्श्यते। एतन्नृत्यं प्रेक्षकानां मनांसि विमोहयति। वर्तमानकाले सामाजिक-सांस्कृतिकपरिवर्तनानुरूपं पैयाँ-नृत्येऽपि नूतनाः कलात्मकप्रयोगाः तथा अभिनवायामाः समाविष्टा दृश्यन्ते।

पैयाँ-नृत्यं द्विविधं परिगण्यते—**गीति-पैयाँ**तथा**अगीति-पैयाँ**। (दहितः, २०७७, पृ. १४५) गीति-पैयाँ-नृत्ये गीतगायनस्य सहचर्येण नृत्यं सम्पद्यते, अगीति-पैयाँ-नृत्ये तु केवलं मादलवादनस्य तालानुगुण्येन नृत्यप्रदर्शनं विधीयते। एषः नृत्यप्रकारः मादलवादकानां नर्तकानां च स्वकीयकौशलस्य, लयबोधस्य, कलात्मकप्रतिभायाश्च प्रदर्शनाय उत्कृष्टतममवसरं प्रददाति।

अधुना सख्या-नृत्यस्य अविभाज्याङ्गरूपेण प्रतिष्ठितं पैयाँ-नृत्यं विविधेषु सांस्कृतिकमञ्चेषु, महोत्सवेषु तथा सार्वजनिककार्यक्रमेषु विशेषलोकप्रियतां प्राप्तम् अस्ति। वस्तुतः सख्या-नृत्यं केवलं लोकमनोरञ्जनस्य माध्यमं न, अपि तु थारूजनजातेः सांस्कृतिकपरम्परायाः, सामाजिकैक्यस्य, धार्मिकविश्वासस्य, लोककलायाः च संरक्षण-संवर्धनयोः प्रभावकरूपेण कार्यं कुर्वन् अमूल्यः सांस्कृतिकधरोहर इति परिगण्यते।

### *(ग) मघौट-नृत्यम्*

थारू-जनसमुदाये**माघी-महोत्सवस्य**सामाजिक-सांस्कृतिक-धार्मिकदृष्ट्या विशिष्टं महत्त्वमस्ति। अयं महोत्सवः थारू-समुदायस्य वार्षिकजीवनचक्रे प्रमुखतमेषु पर्वसु अन्यतमः परिगण्यते। अस्य पर्वणः समागमे जनाः स्वादिष्टान्नभोजनपूर्वकं गीत-वाद्य-नृत्यैः सह परमानन्देन, सामुदायिकोत्साहेन चोत्सवं समाचरन्ति।

माघी-महोत्सवस्यावसरे यत् पारम्परिकं नृत्यं प्रदर्श्यते, तत्**मघौट-नृत्यम्**इति प्रसिद्धमस्ति। अस्मिन् नृत्ये**ढुम्रु**, **ढमार**, **डफ**अथवा**मादल**-वाद्यानां तालानुगुण्येन मौलिकानि**मघौट-गीतानि**गीयन्ते। एतेषु गीतिषु मानवजीवनस्य नानाविधानुभवाः, सामाजिकव्यवहाराः, पारिवारिकसम्बन्धाः, हास्य-विनोदः, लोकविश्वासाः, ऋतुचक्रं, दैनन्दिनजीवनस्य विविधाः प्रसङ्गाश्च सजीवतया निरूपिताः भवन्ति। (दहितः, २०७७, पृ. १४९, १५०)

मघौट-नृत्यस्य प्रमुखवैशिष्ट्यं गृहात् गृहं गत्वा सामूहिकरूपेण गीतगायन-नृत्यप्रदर्शनयोः आयोजनमस्ति। अस्य परम्परायाः माध्यमेन न केवलं मनोरञ्जनं सम्पद्यते, अपितु ग्रामवासिनां परस्पर-सौहार्दं, सामाजिकैक्यम्, सांस्कृतिकसंस्काराणां संरक्षणञ्च सुदृढीक्रियते।

एवं मघौट-नृत्यं थारू-समुदायस्य लोकजीवनस्य, सांस्कृतिकवैभवस्य, सामुदायिकसमन्वयस्य च जीवन्तं प्रतीकमिति परिगण्यते। एतन्नृत्यम् आनन्दस्य, परम्परायाः, लोकचेतनायाश्च समन्वितमभिव्यक्तिरूपमस्ति।

अस्य नृत्ये गीयमानानां मघौट-गीतानां केचन प्रतिनिधिनिदर्शनरूपाः उदाहरणानि अधोलिखितानि सन्ति।

**मूलरूप**

युवक : धाइ धाइ खोजनु बनिया दुकानरे हाँ, धाइ धाइ खोजनु,
सखिय हो कहिडेओ बनिया सेन्दुराकै मोल, सखिय हो।
कहिडेओ बनिया सेन्दुराकै मोल सखिय हो।। १।।
व्यापारी : आछि आछि सेन्दुराकै लाछ हेरुपैयाँ रे हाँ, आछि आछि सेन्दुराकै,
सखिय हो यिहँ हुँमै सेन्दुराकै मोल, सखिय हो।
यिहँ हुँमै सेन्दुराकै मोल, सखिय हो।। २।।
युवक : धाइ धाइ खोजनु बनिया दुकानरे हाँ, धाइ धाइ खोजनु,

सखिय हो कहिडेओ बनिया टिकुलीकै मोल, सखिय हो।
कहिडेओ बनिया टिकुलीकै मोल, सखिय हो।।३।।
व्यापारी : आछि आछि टिकुलीकै, लाछ हे रुपैयाँ रे हाँ, आछि आछि टिकुलीकै,
सखिय हो यिहँ हुँमै टिकुलीकै मोल, सखिय हो।
यिहँ हुँमै टिकुलीकै मोल, सखिय हो।।४।।
युवक : धाइ धाइ खोजनु बनिया दुकानरे हाँ, धाइ धाइ खोजनु,
सखिय हो कहिडेओ बनिया कजुलाकै मोल, सखिय हो।
कहिडेओ बनिया कजुलाकै मोल, सखिय हो।।५।।
व्यापारी : आछि आछि कजुलाकै लाछ हेरुपैयाँ रे हाँ, आछि आछि कजुलाकैमोल,
सखिय हो यिहँ हुँमै कजुलाकै मोल, सखिय हो।
यिहँ हुँमै कजुलाकै मोल, सखिय हो।।६।।

*(जीतमान चौधरी, भी.न.पा, १, भाँसी, कञ्चनपुर)*

***भाषानुवाद:***

**युवकः**—अहो सखे! अहं शीघ्रं वणिजः आपणं प्रति धावामि। त्वं कृपया वणिजं पृच्छ—सेन्दूरस्यमूल्यं कियत्?

**वणिक्**—आम्, अत्र श्रेष्ठगुणयुक्तः सेन्दूरः विद्यते। तस्य मूल्यं रूप्यकाणां निश्चितपरिमाणमेव अस्ति। इच्छसि चेत् अत्रैव प्राप्नुहि।

**युवकः**—अथ त्वं कृपया वणिजं पुनः पृच्छ—टिकुल्याःमूल्यं कियत्?

**वणिक्**—आम्, अत्र सुन्दररूपा टिकुली अपि उपलब्धा। तस्याः मूल्यं यथोचितमेव निर्धारितम् अस्ति।

**युवकः**—अथ च**कज्जलस्य**मूल्यं कियत्, इति अपि ज्ञापय।

**वणिक्**—अत्र उत्तमगुणयुक्तं कज्जलमपि विद्यते। तस्य मूल्यं न्याय्यरूपेण विनिश्चितम् अस्ति।

इत्येवं युवकस्य वणिजश्च संवादरूपेण गीतस्य प्रवाहः प्रवर्तते। अत्र स्त्री-शृङ्गारोपयोगीनां द्रव्याणां क्रयविक्रयस्य प्रसङ्गः मधुरया संवादशैल्या निरूपितः।

## गीतस्य सांस्कृतिक-विश्लेषणम्

अयं मघौट-गीतः थारू-समुदायस्य सामाजिकजीवनस्य आर्थिकव्यवहारस्य च सजीवं प्रतिबिम्बमुपस्थापयति। युवक-वणिजोः संवादरूपेण रचितत्वात् अस्य गीतस्य नाटकीयता स्वाभाविकतया वर्धते। गीते सेन्दूरः, टिकुली, कज्जलमित्यादीनि स्त्री-प्रसाधनद्रव्याणि केवलं अलङ्कारोपकरणरूपेण न, अपितु दाम्पत्यजीवनस्य, प्रेमभावस्य, सामाजिकरीतेः च प्रतीकत्वेन प्रयुक्तानि सन्ति।

अस्य गीतस्य माध्यमेन ग्राम्यसमाजस्य स्थानीयवाणिज्यव्यवस्था, परस्परविश्वासः, सामाजिकसम्बन्धाश्च अप्रत्यक्षरूपेण प्रकाशन्ते। प्रश्नोत्तरात्मकसंवादः लोकगीतपरम्परायाः वैशिष्ट्यमावहति तथा सामूहिकगायनस्य माधुर्यमपि वर्धयति।

एषः गीतप्रकारः केवलं मनोरञ्जनाय न प्रयुज्यते, अपितु लोकसंस्कृतेः संरक्षणाय, सामाजिकसमन्वयस्य संवर्धनाय, पारम्परिकमूल्यानां प्रसारणाय च महत्त्वपूर्णमाध्यमत्वेन प्रतिष्ठितः।

**माघी-महोत्सवस्य प्रारम्भः तथा रात्रिजागरणपरम्परा**

अस्य महोत्सवस्य प्रारम्भः पौषमासस्य अन्तिमदिने भवति। तस्मिन्नेव दिने रात्रौ**देशबन्ध्या**, **गुरुवा**, अन्ये च ग्रामस्य प्रत्येकगृहस्य गृहपतयः**भल्मन्सा (बरघर)**-गृहे समागच्छन्ति। ते धून्यां प्रज्वलितस्य वह्नेः समीपे उपविश्य ढोल-, डफ-, मादल-वाद्यानां तालानुसारेण सुख-दुःखयोः, प्रेम-स्नेहयोः, जीवनानुभवानां च विषयान् आधारीकृत्य**ढुम्रु**तथा**ढमार**-गीतानि गायन्ति।

एवं ते मकरसंक्रान्तेः सम्पूर्णां रात्रिं जागरणेन व्यतीत्य धार्मिक-सांस्कृतिक-सामुदायिकैक्यस्य भावनां सुदृढयन्ति। एषा परम्परा थारू-समुदायस्य सांस्कृतिकस्मृतेः, सामूहिकचेतनायाः, लोकविश्वासस्य च जीवन्तप्रतीकरूपेणाद्यापि प्रचलिता वर्तते।

**मूलरूप**

श्रृङ्गारिक ढमार–

राजकुमार– अइ सोनारी सोनारी, मेरो मन हारी लइगै ग्वालिन हो,
अइ सोनारी सोनारी, मेरो मन हारी लइगै ग्वालिन हो।
कि टोही ग्वालिन साँच चह्लल रे, कि टोही सोलरा मेखाइल ऽऽऽऽ....।।
अइ सोनारी सोनारी, .....................,

ग्वालिनी– न महि ग्वालिन साँच चह्लरे, न महि सोलरा मेखाइल ऽऽऽऽ....।
बाप मटारी मोरे जल्म डिहलनै रे भगेवन डिहल सरुपे ऽऽऽऽ....।।
अइ सोनारी सोनारी, .....................,
अइ सोनारी सोनारी, .......................।

(जीतमान चौधरी, भीनपा, १, भाँसी कञ्चनपुर)

***भावानुवादः***

**राजकुमारः—**

अये सुवर्णकान्ति! अये मृगनयने!
त्वया मम हृदयं सहजमेव हृतम्।
किं त्वं विश्वकर्मणा स्वर्णमये साचे विनिर्मिता,
उत विधात्रा स्वहस्तेन सौन्दर्यस्य सारभूता सृष्टासि?

किं ते मुखमिन्दोः कान्तिमपहृत्य निर्मितम्?
किं ते नयनयुगलं नीलोत्पलयोः प्रसादमवाप?
किं ते हासः नवमल्लिकामुकुलानामपि गौरवं हरति?

अहो! त्वद्रूपदर्शनमात्रेण मम चेतः स्वाधीनतां विहाय
त्वय्येव नितरां निमग्नमभवत्।

**गोपालिका—**

आर्य! नाहं सुवर्णकारस्य कौशलेन विनिर्मिता,
नापि मानुषशिल्पिनः कलायाः परिणामः।
मम शरीरं मातापित्रोः प्रसादेन प्राप्तम्,
रूपं तु विधातुः करुणया,
लावण्यं प्रकृतेः प्रसन्नतया,
माधुर्यं भगवतः प्रसादेन च समुपलब्धम्।
यदि मयि किञ्चिदाकर्षणं दृश्यते,
तत् न मम गौरवाय,
अपि तु सृष्टिकर्तुः अनुपमशिल्पवैदग्ध्यस्यैव प्रमाणम्।
तस्मात् मा मां स्तौषीः;
सर्वं सौन्दर्यं परमेश्वरस्यैव विभूतिरिति मन्ये।

**ढमार-गीतस्य भावव्याख्या**

अस्मिन् प्रस्तुते ढमार-गीते राजकुमारः गोचारणनिरतायाः गोपालिकायाः यौवनमाधुर्येण नैसर्गिकलावण्येन च विमुग्धः सन् तस्याः अनुपमसौन्दर्यस्य रहस्यं ज्ञातुमिच्छति। सः तस्याः रूपमाधुर्यं दृष्ट्वा तां स्वर्गलोकसमुत्पन्नामप्सरसमामिव मन्यते। जातिविशेषम् अनपेक्ष्य तां स्वजीवनसहचारिणीं कर्तुमभिलषति।

तस्य हृदये समुत्पन्नानुरागस्याभिव्यक्तिरूपेण सः सस्नेहमाह—“हे सुवर्णवर्णे! त्वया मम मनः पूर्णतया हृतम्। किं त्वं कस्यचित् सुवर्णकारस्य कौशलेन साचे विनिर्मिता, येन त्वयि एतादृशमद्वितीयं सौन्दर्यं निवेशितम्?”

एवं पृष्टा गोपालिका विनयपूर्वकं प्रत्युत्तरं ददाति—“नाहं कस्यापि शिल्पिनः कृत्रिमनिर्माणस्य परिणामः। मम जन्म माता-पित्रोः प्रसादेन जातम्; रूपं लावण्यं च भगवतः कृपाप्रसादेन प्राप्तम्। ” इत्यनेन सा नैसर्गिकसौन्दर्यस्य दैवप्रदत्तत्वं प्रतिपादयति।

अस्य संवादस्य माध्यमेन परस्परानुरागः, सौन्दर्यबोधः, विनयशीलता, दैवविश्वासश्च समन्वितरूपेण अभिव्यक्ताः भवन्ति। अत्र रतिशृङ्गारस्य कोमलभावः प्रकृतिसौन्दर्यस्य प्रशंसया सह सुसंयततया निरूपितः दृश्यते। अत एव अयं ढमार-गीतः थारू-लोकसाहित्ये श्रृङ्गाररसस्य, लोककल्पनायाः, सांस्कृतिकविश्वासस्य च उत्कृष्टमुदाहरणमिति परिगण्यते।

***(घ) बर्कानृत्यम्***

बर्कानृत्यमिति नाम तस्मान्नृत्यविशेषाय दत्तम्, यतोऽस्मिन् बहवः पात्रविशेषाः सन्ति। तेषु संरक्षकत्वेन बर्कागुरुवा, सहायकगुरवः, अग्रगामिनः पश्चाद्गामिनश्च मन्दर्याः, तेषां समूहः, नानाविधानर्तकगणाश्च भवन्ति; नर्तकानां संख्या प्रायः शतपरिमिता दृश्यते, तथा चैतन्नृत्यं बहुदिनव्यापिनमपि भवति। (दहितः, २०७७, पृ. १५०, १५१)अस्मिन्नृत्ये केवलं पुरुषाणामेव सहभागिता विद्यते, सर्वे च तन्नृत्यसमारम्भे साहसं न कुर्वन्ति। तान्त्रिकविधिविधानानुगतत्वात्, बहुव्ययापेक्षत्वात्, सर्वेषां सदस्याणां सम्यगुद्यमाभावे चास्य सम्पादनं न शक्यते। एतदर्थं थारूजनसमाजे प्रचलितस्य महाभारतकथावृत्तस्य तद्गीतानां च सम्यग्ज्ञानमपेक्षितम्। अस्मिन्नृत्ये केचन

पुरुषनर्तकाः स्वाभाविकवेषेण, अन्ये तु स्त्रीवेषधारिणः सन्तो नृत्यन्ति। तेष्वेव कश्चन नर्तकः महाभारतप्रसिद्धायाः द्रौपद्याः पात्रमभिनयति। नर्तकान् दुष्टात्मनां कुदृष्टेः परिरक्षितुं गुरूणां विशेषो दायित्वभागः भवति। एवं बर्कानृत्यं थारूजनसमाजस्येतिहासे महत्त्वपूर्णं सांस्कृतिकमुपादानमिति मन्यते।

### *ङ ) छोक्रा नृत्यम्*

छोक्रानृत्यं थारूजनसमुदायस्य अतीव लोकप्रियं नृत्यमस्ति। यदा पुरुषनर्तकाः स्त्रीवेषमालम्ब्य लहङ्गा–सट्की–चोलिका–तिलकचिह्नानि–कङ्कणादीनि धारयन्ति, अथवा स्त्रीनर्तक्यः स्वकीयैर्मौलिकाभरणैः समलङ्कृताः सन्त्यः विशेषमृदङ्गस्य तालमनुसृत्य नृत्यन्ति, तदा तत् नृत्यं **छोक्रानृत्यम्** इति कथ्यते। (दहितः, २०७७, पृ. १५१)गीतगायकाः, ये गिदारव इति प्रसिद्धाः, कुमारककन्याभेदेन द्विधा विभक्ताः सन्तः प्रेमभावसमन्वितानि संवादात्मकगीतानि गायन्ति। तेषां मर्मस्पृशानि गीतानि मनोहरं नर्तनं च प्रेक्षकान् परममुदितान् तथा रोमाञ्चितान् कुर्वन्ति। अस्मिन्नृत्ये वादकानां नर्तकानां गायकानां च संख्या नियता न भवति। विशेषतः पश्चिमथरूहटप्रदेशे पर्वोत्सवेषु, विवाहसमये, विवाहोत्तरकाले वधूप्रेषणावसरे तस्याः सखीजनानां सत्कारार्थम्, तथा विविधोत्सवसभासमारोहादिषु चेदं नृत्यं प्रचलितमस्ति।

### *च) हुर्डुङ्ग्वा नृत्यम्*

हुर्डुङ्ग्वानृत्यमपि थारूजनसमाजे प्राचीनकालादारभ्य महता उत्साहेन सम्पाद्यमानं अतीव लोकप्रियं च नृत्यमस्ति। एकेन द्वाभ्यां वा मादलवादकाभ्यामनुगतम्, द्वयोर्गायकसमूहयोः सहभागेन, तयोरेव समूहयोर्मध्यात् केनचित् गीतस्य प्रास्ताविकभागो गीयते, अनन्तरं तदेव गीतं समुचितलयानुगुणं उभाभ्यां समूहाभ्यां पर्यायेण गीयमानं नृत्यते; एतादृशं नृत्यं हुर्डुङ्ग्वानृत्यमिति व्यवह्रियते। पूर्वं प्रायेण पुरुषा एव स्त्रीवेषधारिणो नृत्यन्ति स्म; अधुना तु स्त्रीणामपि सहभागिता उल्लेखनीया दृश्यते। अस्मिन्नृत्ये मादलतालानुसारेण नर्तकाः गायकाश्च परमोत्साहेन शीघ्रगत्या सञ्चरन्तः **ओइहोई ओइहोई** अथवा **हुक्खुई हुक्खुई** इति घोषं कुर्वन्तः सम्मिलितं नृत्यं कुर्वन्ति, (दहितः, २०७७, पृ. १४८)यस्य प्रभावेण प्रेक्षकजनोऽपि सहर्षमाविष्टो भवति। सर्वकालेषु सम्पादनीयमिदं नृत्यं श्रीरामस्य रावणविजयमहिमानं गायतः विशेषतः प्रसिद्धम्; तत्र प्रहरभेदेन गीतलयः मादलतालश्च परिवर्तते। यथा “रामककहरा” मध्याह्ने, “लटिया” सायंकाले, “रामविहग्रा” प्रभातसमये, “महीरावणविहग्रा” प्रातःकाले च गीयते। अद्यत्वे तु प्रेमविषयकहुर्डुङ्ग्वागीतेष्वपि आधुनिकप्रवृत्तेः प्रभावो दृश्यते। भक्तिरसस्य शृङ्गारभावस्य च वहनकर्तृत्वेनायं लोकतत्त्वसमन्वितः साहित्यप्रकारः स्वकीयमविशिष्टं स्थानमधितिष्ठति।

### *छ) बरमास्या नृत्यम्*

बरमास्यानृत्यमिति नाम तस्मै नृत्यविशेषाय विहितम्, यतो हि **बरमास्या** इत्यस्य शब्दस्य द्वादशमासपर्यन्तत्वेऽर्थः प्रसिद्धः। (दहितः, २०७७, पृ. १५२)अस्य समुदायस्य प्रमुखो जीविकोपायः कृषिकर्म; अत एव वर्षस्य सर्वेषु मासेषु कृषिश्रमजनितक्लान्तिनिवारणाय तथा विविधेषु पर्वोत्सवेषु मनोरञ्जनार्थं चेदं नृत्यं सम्पाद्यते। सर्वकालेषु निर्विघ्नतया नर्तुं शक्यत्वात् सदैव प्रचलितमिदं नृत्यं थारूजनसमाजे अत्यन्तं लोकप्रियमस्ति। प्रायेणैकः

मादलवादकः, एका नर्तकी, गीतगायकाश्च स्त्रीपुरुषभेदेन द्वयोः समूहयोः विभक्ताः सन्तः महानुत्साहेन गीतानि गायन्तो नृत्यं निर्वर्तयन्ति ।

### *ज) लट्ठह्वा नृत्यम्*

लट्ठह्वानृत्यमिति तन्नृत्यं कथ्यते, यस्मिन् युगलरूपेण स्थितौ नर्तकनर्तक्यौ स्वहस्तयोः एकैकं द्वौ द्वौ वा लघुदण्डौ धृत्वा मादलतालानुसारेण नृत्यतः । अस्मिन्नृत्ये मादलवादकावपि प्रायेण युगलरूपेण भवतः । केवलं मादलवाद्यतालाश्रितत्वादत्र गीतगायनं न विद्यते । नर्तकानां शारीरिकसुदृढतासम्पादनदृष्ट्या चेदं नृत्यं विशेषोपकारकमिति मन्यते । लघुदण्डानामुपयोगेन कलायाः विविधरूपाणां प्रदर्शनात् प्रेक्षकाः परितोषमधिकं प्राप्नुवन्ति । प्रायेण दशहरा–दीपावलीपर्वणोः समुपलक्ष्य सम्पाद्यमानमिदं नृत्यमधुना विशिष्टेषु रङ्गमञ्चीयकार्यक्रमेष्वपि बहु प्रशंसामवाप्नोति । पूर्वकाले केवलं पुरुषाणामेवात्र सहभागिता आसीत्; अधुना तु स्त्रीणामपि तत्र विशेषाकर्षणं वर्धते । (दहितः, २०७७, पृ. १४८)नृत्योपयोगिनः स्वदेशीयाः शोभनवेषाः प्रस्तुतेः रमणीयतामधिकां कुर्वन्ति । सामूहिकस्वरूपत्वादस्य सम्यग्व्यवस्थापनार्थमेक आग्रणी, एकः पश्चाद्गामी, अनिष्टपरिहाराय चैकः गुरुवोऽपि सह वर्तमानो भवति । एतन्नृत्यस्यारम्भानन्तरं न्यूनातिन्यूनं त्रिवर्षाणि पञ्चवर्षाणि वा नृत्यं कृत्वा विधिविधानपूर्वकपूजनसमन्वितेन संस्कारेण तस्य समापनं विधीयते ।

### *झ) मुङ्ग्रह्वा नृत्यम्*

मुङ्ग्रह्वानृत्यमपि लट्ठह्वानृत्यसदृशमेव भवति । अस्मिन्नृत्ये युगलरूपेण स्थितौ नर्तकनर्तक्यौ स्वहस्तयोरेकस्मिन् काष्ठनिर्मितं मुङ्ग्रं धृत्वा केवलं मादलतालमनुसृत्य नृत्यतः; अत एव तत् **मुङ्ग्रह्वानृत्यम्** इति प्रसिद्धम् । अत्रापि मादलवादकौ युगलरूपेण भवतः । नृत्यस्य सम्यग्व्यवस्थापनार्थं दलाध्यक्षः गुरुवश्च सह वर्तमानौ स्तः । गुरुः नर्तकगणस्य दुष्टात्मभ्यः संरक्षणाय मन्त्रसंस्कृतामक्षतां जलं लवङ्गादीनि च प्रददाति, नृत्यपर्यवसानपर्यन्तं च काले काले अक्षतान् विकिरति । (दहितः, २०७७, पृ. १४७)

थारूजनानां मौलिकवेषेषु नृत्यदले प्रायेण द्वौ श्वेतवस्त्रधरौ भवतः; एतादृशं वसनं **जमहुवा** इति कथ्यते । युगलरूपेण स्थितयोर्मादलवादकयोः सर्वेषां कलाकाराणां च पृष्ठभागे मयूरपिच्छानि, मनोहरवर्णविचित्रकञ्चुकाः, शिरसि फुन्नायुक्ता शिरवस्त्रं, श्वेता वा वर्णविचित्रा पगडी, कण्ठे गल्याभरणं, उभयकक्षयोः शोभनौ सप्कीभूषणविशेषौ, कट्यां विस्तीर्णो घण्टिकायुक्तः करधनीबन्धः, लघुधोती च धार्यते । मादलवाद्यमपि रमणीयतया भूष्यते । अस्य नृत्यस्य विधिविधानानुसारमप्यारम्भानन्तरं त्रिवर्षाणि पञ्चवर्षाणि सप्तवर्षाणि वा निरन्तरं नर्तव्यमिति परम्परा विद्यते ।

**थारूजनानां लोकनृत्यानां लोकगीतानां च सौन्दर्यात्मकपक्षे निम्नलिखितानि वैशिष्ट्यानि प्राधान्येन दृश्यन्ते—**

(१) मनोरञ्जनमाध्यमत्वेन तानि शारीरिकीं मानसिकीं च सुदृढतां संवर्धयन्ति,

(२) सामूहिकाभ्यासेन नेतृत्वक्षमतायाः विकासः सम्पद्यते,

(३) मौखिकपरम्परया प्रवर्तमानस्य लोकसाहित्यस्य भाविपीढीषु संप्रेषणे तानि महदुपकारं कुर्वन्ति,

(४) सांस्कृतिकसंसर्गेण भ्रातृभावः परस्परसहकारवृत्तिश्च प्रवर्धेते,

(५) दृढनैतिकमूल्यानां शिक्षां प्रदाय राष्ट्रियैक्यस्य संवर्धने विशेषं योगदानं वहन्ति।

## निष्कर्षः

अद्यत्वे वयं चिरकालादारभ्य समाजस्य समुन्नतये, राष्ट्रस्य सर्वाङ्गीणविकासाय, वृत्तिहीनता-समस्याया निराकरणाय, राष्ट्रस्य रूपान्तराय च विविधप्रकारान् मन्तव्यान् प्रतिपादयामः। देशस्य मेरुदण्डभूतां दक्षामदक्षां च युवाशक्तिं स्वदेशे एव संस्थापयितुं, स्वदेशीयपूञ्जीपलायनं निरोद्धुं, आर्थिकसुदृढतां संवर्धयितुं च निरन्तरं प्रयत्नशीलाः स्मः। तथापि एतासां समस्यानांसमुचितपरिहारार्थं केवलं वाग्विलासः पर्याप्तो न भवति, अपि तु व्यवहारोपयोगिनां वैकल्पिकोपायानामन्वेषणमात्यावश्यकम्।

आर्थिकसमृद्धेर्विना न समाजस्य स्थायिविकासः, न च राष्ट्रस्य समग्रोन्नतिः सम्भवति। अतः थारू-समुदायस्य तथा अन्येषां कलाप्रेमिणां युवानां लोकसंस्कृतेः सामाजिक-सांस्कृतिक-आर्थिकोपयोगित्वं सम्यग् बोधयित्वा तान् आर्थिकस्वावलम्बनस्य मार्गे प्रवर्तयितुं प्रयत्नः करणीयः।

एतदर्थं राज्येन केन्द्रीय-प्रादेशिक-स्थानीयस्तरेषु सांस्कृतिकसंसाधनकेन्द्राणि स्थापनीयानि। तेषु केन्द्रेषु लोकसंस्कृतिक्षेत्रे विशिष्टानुभवसम्पन्नान् विद्वांसः, कलाकाराः, अनुसन्धानकर्तारश्च प्रशिक्षकरूपेण नियुक्तव्याः। तेषां मार्गदर्शनेन लोककलासु रुचिं वहन्तः युवानः सैद्धान्तिक-व्यावहारिकयोः पक्षयोः सम्यक् प्रशिक्षयितुं शक्यन्ते। एवं प्रशिक्षणस्य फलस्वरूपं भाविवंशजाः शारीरिकदृष्ट्या, मानसिकदृष्ट्या, सांस्कृतिकदृष्ट्या, आर्थिकदृष्ट्या च सबला, आत्मनिर्भराश्च भविष्यन्ति।

अत एव लोकसंस्कृतेः संरक्षणं केवलं सांस्कृतिककर्तव्यरूपेण न ग्राह्यम्, अपितु तद् राष्ट्रस्य आर्थिकविकासस्य, सामाजिकस्थैर्यस्य, सांस्कृतिकस्वाभिमानस्य च प्रभावकमाध्यममिति मन्यते।

समग्रस्य नेपालराष्ट्रस्य सांस्कृतिकपरिचायकत्वेन प्रतिष्ठितानि थारू-समुदायस्य मौलिकानि लोककलारूपाणि, यथा—झुम्रा, सख्या, लठ्ठह्वा, मघौट-नृत्यम् बर्का-नृत्यम्, मुङ्ग्रह्वा, बिहग्रा, बरमास्या, झर्रा, हुर्डुङ्ग्वा, छोक्रा, बिरहिन-चाँचर, चोरखेलिया, कठघोरी, होरी-गीतानि तथा होरी-नृत्यानि, तेषां पारम्परिकवेषभूषाभिः सह वैज्ञानिकदृष्ट्या सम्यगनुसन्धानं कृत्वा प्रामाणिकरूपेण लिपिबद्धीकरणमात्यावश्यकम्। एतादृशं दस्तावेजीकरणं न केवलं सांस्कृतिकसंरक्षणस्य साधनं भवति, अपि तु भाविपीढीनां कृते विश्वसनीयज्ञानस्रोतोरूपेणापि महत्त्वमावहति।

तथापि संरक्षणस्य, आधुनिकीकरणस्य वा नाम्ना तेषां मौलिकस्वरूपस्य परित्यागः कदापि न करणीयः। **मौलिकतासंरक्षणमेव सांस्कृतिकसंवर्धनस्य मूलमन्त्रः**इति सर्वदा स्मर्तव्यम्। नवीनप्रयोगाः, आधुनिकप्रविधयः च तावदेव ग्राह्याः, यावत्ते मूलपरम्परायाः स्वरूपं न विकुर्वन्ति।

एतस्याः लोकसंस्कृतेः प्रभावीप्रवर्धनार्थं विभिन्नेषु**आतिथ्यगृहेषु (होम-स्टे)**, **विश्रामगृहेषु (होटेल्)**, **भोजनालयेषु (रेष्टुरेण्ट)**च थारू-कलाकाराणां माध्यमेन पर्यटकेभ्यः लोकगीत-लोकनृत्य-लोकवाद्यादीनां सजीवं

प्रदर्शनं कारयितुं शक्यते। अनेन पर्यटकानां मनोरञ्जनं सम्पन्नं भविष्यति, पर्यटनोद्योगस्य च विकासः सुदृढो भविष्यति।

तथैव थारू-समुदायस्य मौलिकभोजनपदार्थान्—**ढिक्री**, **खेऱ्या**, **अन्दिक-उष्णोदकपक्वोदनम्**, **रोटिका**, **जैविक-सुरा (जाँड)**, स्थानीयफलनिर्मिता मदिरा, **गङ्गटा**, **घोङ्घी**, **मूषिकमांस-चट्नी**, **वराहमांसम्**, मत्स्यनिर्मितविशिष्टभोजनानि च पर्यटकेभ्यः सम्यगुपस्थाप्य तेषां सन्तोषः सम्पादयितुं शक्यते। एतेषां पारम्परिकभोजनानां सुव्यवस्थितप्रचारेण विक्रयेण च एकतः स्थानीयजनानाम् आयोपार्जनस्य नूतनाः अवसराः सृज्येरन्, अपरतः आन्तरिक-वैदेशिकपर्यटनयोः अभिवृद्धिः स्यात्, बेरोजगारी-समस्यायापि किञ्चिद् निराकरणं सम्भवेत्।

दोहनयोग्यधेनुसदृशीं जैविकस्वरूपिणीं थारू-संस्कृतिं यावत् व्यावसायिकविकासेन आयोपार्जनव्यवस्थया च न सम्बध्यते, तावत् समग्रसमाजस्य राष्ट्रस्य च सर्वाङ्गीणोन्नतिः सुसाध्या न भवति। अतः एतदर्थं प्राज्ञसंस्थाभिः—यथा विभिन्नैर्विश्वविद्यालयैः, नेपालप्रज्ञाप्रतिष्ठानेन, थारू-लेखक-सङ्घेन, थारू-कल्याणकारिणी-सभया चान्यैश्च सम्बन्धितसंस्थाभिः—प्राथमिकतया सम्यगनुसन्धानं विधाय व्यवहारोपयोगिनः नीतिनिर्देशाः, कार्यमार्गदर्शनानि च प्रदातव्यानि।

तदनन्तरं सर्वैः सरोकारसम्पन्नैः पक्षैः परस्परसमन्वयेन तेषामनुसन्धेयविषयाणां सङ्घीय-प्रादेशिक-स्थानीयसरकाराणां समानचिन्तनविषयरूपेण स्वीकरणं करणीयम्। तेषां कार्यान्वयनार्थं सुस्पष्टनीतिनिर्माणम्, पर्याप्तवित्तविनियोगः, समयबद्धकार्ययोजना, दृढप्रशासनिकप्रतिबद्धता च अनिवार्यतया अपेक्ष्यते।

थारू-संस्कृतिः नेपालस्य बहुविधसांस्कृतिकवैचित्र्यरूपस्य सुन्दरस्य उद्यानस्य रमणीयतमं पुष्पमिव विराजते। तस्याः विना नेपालराष्ट्रस्य सांस्कृतिकगौरवं न पूर्णतामधिगच्छति। अतः अस्याः संस्कृतेः सौन्दर्यं, माधुर्यं, सुरभित्वं च स्वदेशे विदेशे च प्रसारयितुं सर्वेषां नागरिकाणां समानं नैतिकदायित्वं वर्तते। एतदर्थं लोकनृत्य-लोकगीत-लोकवाद्यादिसहितायाः समग्रायाः थारू-संस्कृतेः विषये सैद्धान्तिकं व्यावहारिकं च अनुसन्धानं विधाय तस्याः प्रामाणिकदस्तावेजीकरणं, दृश्यश्राव्यदस्तावेज-निर्माणं (Documentary), आधुनिकसञ्चारमाध्यमानां समुचितोपयोगेन व्यापकप्रचारप्रसारश्च अत्यावश्यकः।

अस्य सर्वस्य प्रयत्नस्य परमलक्ष्यं राष्ट्रीयैक्यस्य संवर्धनम्, नेपालराष्ट्रस्य अन्तर्राष्ट्रीयस्तरे विशिष्टपरिचयस्य प्रतिष्ठापनम्, पर्यटनोद्योगस्य प्रवर्धनम्, तदाधारितस्य आयोपार्जनस्य सुदृढीकरणं च भवितुमर्हति। अतः सर्वे सम्बन्धिनः पक्षाः दृढसंकल्पपूर्वकं समन्वितरूपेणास्मिन् कार्ये प्रवर्तेरन्।

यद्येतानि धार्मिक-सांस्कृतिक-सामाजिकदृष्ट्या महत्त्वपूर्णानि थारू-मौलिक-लोकनृत्यानि आधुनिकप्रौद्योगिकीभिः सुसंयोज्य आर्थिकोपार्जनव्यवस्थया सह सम्यगनुबध्येरन्, तर्हि एषा सांस्कृतिकसम्पदा भाविपीढीषु सहजतया सङ्क्रामिष्यति। तेन सांस्कृतिकपरम्परायाः संरक्षणं, आर्थिकसमृद्धेः अभिवृद्धिः, राष्ट्रस्य सांस्कृतिकप्रतिष्ठायाश्चोन्नयनमैककालमेव साधयितुं शक्यते। एतस्मिन् विषये प्रायः न कस्यापि मतभेदस्यावकाशो विद्यते।

## सन्दर्भग्रन्थसूची

चौधरी, मोहनप्रसादः (२०६२)*कञ्चनपुरजनपदे अधिकांश-थारू-जनैः प्रयुज्यमानाया थारूभाषायाः तथा लोकोक्तीनामध्ययनम्* (अप्रकाशितं शास्त्रीस्तरीयं शोधप्रबन्धः), नेपालसंस्कृतविश्वविद्यालयः, शारदाविद्यापीठम्, महेन्द्रनगरम्, कञ्चनपुरम् ।

चौधरी, मोहनप्रसादः (२०६९)*कञ्चनपुरजनपदे प्रचलितायाः डँगौरा-थारूभाषायाः एकमध्ययनम्* (अप्रकाशितः स्नातकोत्तरस्तरीयः शोधप्रबन्धः), त्रिभुवनविश्वविद्यालयः ।

थारू, फनिश्यामः (२०६९)*थारू-लोकसंस्कृतिः तथा चाडपर्वाणि*, नेपालप्रज्ञाप्रतिष्ठानम्, कमलादी, काठमाण्डौ ।

दहितः, गोपालः (२०७७)*थारू-संस्कृतेः परिचयः*, ड्रीम ग्राफिक्स्, काठमाण्डौ ।

थापा, धर्मराजः, सुवेदी, हंसपुरेः (२०३०)*नेपाली-लोकसाहित्यस्य विवेचनम्*, नेपालराजकीयप्रज्ञाप्रतिष्ठानम् ।

शर्मा, मोहनराजः, लुइटेलः, खगेन्द्रः (२०६३)*लोकवार्ताविज्ञानम् तथा लोकसाहित्यम्*, विद्यार्थीपुस्तकभण्डारः, भोटाहिटी, काठमाण्डौ ।

विषयसम्बद्धैः विभिन्नैःजानकारैः सह प्रत्यक्षसाक्षात्काराः ।

विभिन्नेषुविद्युतीयमाध्यमेषु तथा मुद्रितपत्रपत्रिकासु प्रकाशिताः सन्दर्भलेखाः ।